# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2017 - '18

**Class : IX** | | **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
खण्डः क अपठित अवबोधनम् - 10
खण्डः ख रचनात्मक कार्यम् - 15
खण्डः ग अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ पठितावबोधनम् - 30

## खण्डः क (अपठित अवबोधनम्)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति। अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न श्रृणोति। तस्मात् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन्नेव मौनं धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपाद् सर्वदा आत्मानं रक्षेम।

**I. एकपदेन उत्तरत।** **2**

i) क्रोधे आगते किं धारणीयम्?
ii) क्रुद्धः जनः केषां हितवचनानि न श्रृणोति?

**II. पूर्णवाक्येन उत्तरत।** **4**

i) मनुष्यस्य महान् शत्रुः कः?
ii) मौनेन वाणी कीदृशी भवति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं लिखत।** **2**

i) 'क्रुद्धः' इति कस्य पदस्य विशेषणम्?
(गुरोः, जनस्य, शत्रोः, ज्येष्ठस्य)
ii) 'भवेम' इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम्?
(जनः, वयं, वाणी, क्रोधः)
iii) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम्?
(सर्वदा, नियन्त्रिता, तस्मिन् एव, अपि)
iv) 'असावधानाः' इति पदस्य किं विलोमपदं अत्र प्रयुक्तम्?
(नियन्त्रिता, सर्वदा, सावधानाः, शान्तम्)

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख (रचनात्मक कार्यम्)

**2. भवान् शरदः। अनुजं रोहितं प्रति स्वास्थ्य विषयके अधोलिखिते पत्रे रिक्तस्थानानि मञ्जूषातः उचितं पदं चित्वा पूरयतु।** **5**

| |
|---|
| छात्रावासं, रोहित, सम्यक्रूपेण, सावधाना, छात्रावासे, कानपूरतः, उत्तमम्, शरदः, आहार, दिनचर्यायाम् |

i) ----------------

तिथिः --------------

प्रिय अनुज! ii) ---------------

सप्रेम नमो नमः।

तव पत्रेण ज्ञातम् iii) ------------ गत्वा त्वं अस्वस्थः जातः। गृहे च माता तव iv) ---------- विहारादि विषये सततं v) ----------- आसीत्, परं vi) ---------- एतत् सर्वं कार्यं तु त्वया vii) ----------- एव करणीयम्। तव ----------- समावेशः आवश्यकः अस्ति। यदि स्वास्थ्यम् ix) ----------- भविष्यति तदैव पठने।

भवतः अग्रजः

x) ----------

**3. निम्नचित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्च संस्कृतवाक्यानि लिखत।** **10**

| |
|---|
| पर्वतीयस्थलं, अनेके जनाः, द्विचक्रिकाभिः, वेषभूषा, शिरस्त्राणानि, दृश्यते, हरिता भूमिः, वायुयानम्, वृक्षाः, लताः, चालयन्ति |



अथवा

'सुन्दरम् उपवनम्' – अधिकृत्य पञ्चवाक्यानि लिखत।

| |
|---|
| जनाः, मधु, बालकाः, सुगन्धपुष्पाणि, मधुपाः, चित्रशलभाः, फलवृक्षाः, प्रवहति, संलपन्ति, शुद्धवायुः, वयोवृद्धाः |

## खण्डः ग (अनुप्रयुक्त व्याकरणम्)

**4.क. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i) 'तिष्ठामि' इति पदे दन्त्यः वर्णः कः अस्ति?
(त्, ठ्, म्, ष्)

ii) 'युवकः' इति पदे तालव्यः वर्णः कः अस्ति?
(य्, क्, व्, उ)

iii) 'पश्यति' इति पदे ओष्ठ्यः वर्णः कः अस्ति?
(श्, य्, त्, प्)

iv) 'कृति' इति पदे ----- वर्णः कण्ठ्यः अस्ति।
(ऋ, क्, इ, त्)

**ख. पदानां वर्णविन्यासं कुरुत।** **3**

i) तत्वज्ञानम् ii) भ्रातृस्नेहः iii) शिक्षितवान्

**5. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेंद वा कुरुत।** **6**

i) मम पुस्तके एका कथास्ति।
(कथ + आस्ति, कथा + अस्ती, कथा + अस्ति, कथ + अस्ति)

ii) त्वदागमनम् आर्याय निवेदयामि।
(त्वद् + आगमनं, त्वत् + आगमनं, त्वद् + अगमनं, त्वत् + अगमनं)

iii) सः निर् + रसं फलरसं पिबति।
(निरसम्, नीरसम्, निररसम्, नीररम्)

iv) वृक्षस्य अधः कः + अयम् उपविष्टः?
(कोऽयम्, कअयम्, कोयम्, केऽयम्)

v) विद्या अस्मान् मातेव रक्षति।
(माते + इव, मात + एव, माता + इव, माते + एव)

vi) भक्तः सदा भगवच्चिन्तनं करोति।
(भगवच् + चिन्तनं, भगव + चिन्तनम्, भगवत् + चिन्तनम्, भगवत् + च्चिन्तनं)

**6. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत।** **7**

i) सा ----- पत्रं लिखति।
(लेखन्या, लेखनिना, लेखन्याः, लेखनी)

ii) माता -------- पुस्तकं यच्छति।
(बालके, बालकाय, बालकैः, बालकात्)

iii) यूयं -------- वाटिकायां वृक्षान् आरोपयथ।
(अस्याम्, अस्मिन्, अस्य, अस्याः)

iv) संसारे ------ प्रकाशेन एव जीवाः जीवन्ति।
(रविणा, रवेः, रविम्, रवये)

v) अस्माभिः ------- आज्ञा सदैव पालनीया।
(गुरुभिः, गुरूणाम्, गुरुषु, गुरून्)

vi) पुत्री मातृदिन महोत्सवे -------- उपहारं यच्छति।
(मातुः, मातरि, मात्रे, मात्रा)

vii) महिलाः -------- शुद्धं जलम् आनयन्ति।
(नदीं, नद्यः, नद्यै, नद्याः)

**7. प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्त स्थानानि पूरयत।** **7**

i) भिक्षुकः गृहात् गृहं गत्वा भिक्षां --------।
(याचते, याचेते, याचसे, याचे)

ii) माता पाकशालायां भोजनं -------।
(पचिष्यति, पचयिष्यति, पक्ष्यति, पक्षिष्यति)

iii) युवां किमर्थं गृहकार्यं न --------?
(अकरोत्, अकुरुताम्, अकुरतम्, अकुरोतम्)

iv) सर्वे छात्राः ह्यः चलचित्रं --------।
(पश्यन्ति, अपश्यत्, अपश्यन्, अदृश्यन्)

v) त्वम् अद्य रात्रौ कुत्र ----------?
(गमिष्यसि, गच्छसि, गच्छिष्यसि, गमिष्यति)

vi) सबलाः दुर्बलान् ---------।
(हनन्ति, घ्नन्तु, हिनष्यति, हन्ति)

vii) श्वः अवकाशः --------।
(आसीत्, आस्त, भविष्यति, आसन्)

## खण्डः घ (पठितावबोधनम्)

**8. अधोलिखित गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।**

किन्तु बालस्य अत्र रक्षकः नास्ति। तत् किं करोमि? भवतु चिरकालपालितं इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गतः। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः। सः तं व्यापाद्य खण्डशः कृतवान्। अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः। ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तस्य चरणयोः अलुठत्। विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः अति अवधार्य कोपात् नकुलं व्यापादितवान्।

**I. एकपदेन उत्तरत।** **2**

i) विप्रः बालरक्षार्थं कम् अवस्थाप्य गच्छति?

ii) नकुलं कः हतवान्?

**II. पूर्णवाक्येन उत्तरत।** **1**

i) ब्राह्मणं दृष्ट्वा नकुलः किम् अकरोत्?

**III. भाषिककार्यम्।** **2**

i) 'कृतवान्' - इति क्रियापदस्य कर्तृपदं किम्?
(तं, सः, खण्डशः, ब्राह्मणः)

ii) तम् व्यापाद्य – अत्र 'तम्' इति पदं कस्मै प्रयुक्तम्?
(विप्राय, बालकाय, सर्पाय, नकुलाय)

**9. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत।**

"गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः" ॥

**I. एकपदेन उत्तरत।** **2**

i) गौरवं कथं प्राप्यते?

ii) पयोधीनां स्थितिः कुत्र भवति?

**II. पूर्णवाक्येन उत्तरत।** **1**

i) पयोदानां स्थितिः कुत्र भवति?

**III. भाषिककार्यम्।** **2**

i) 'पयोदः' इति पदस्य कः अर्थः?
(जलम्, समुद्रः, मेघः, आकाशः)

ii) 'धनम्' इत्यर्थे अत्र कः शब्दः प्रयुक्तः?
(चिरम्, वित्तम्, धान्यं, दानं)

**10. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।**

रामः – एहि एहि इक्ष्वाकुकुमार! स्वस्ति, आयुष्मान् भव।
भरतः – अनुगृहीतोऽस्मि।
यावत् भविष्यति भवन्नियमावसानम्।
तावत् भवेयमिह ते नृप! पादमूले ॥
रामः – मे शापितो न परिरक्षसि चेत् स्वराज्यम्।
भरतः – हन्त! अनुत्तरं अभिहितम्। भवतु समयतः ते राज्यं परिपालयामि।

**I. एकपदेन उत्तरत।** **2**

i) 'अनुत्तरम् अभिहितम्' – कस्य वचनमिदम्?

ii) रामः कथं भरतम् आशीर्वादं अकरोत्?

**II. पूर्णवाक्येन उत्तरत।** **1**

i) भरतस्य अभिलाषं किम्?

**III. भाषिककार्यम्।** **2**

i) 'समयतः ते राज्यं परिपालयामि' – अस्मिन् वाक्ये कर्तृपदं किम्?
(रामः, भरतः, त्वं, अहं)

ii) 'ते राज्यं परिपालयामि' – अत्र ते इति पदं कस्मै प्रयुक्तम्?
(रामाय, लक्ष्मणाय, सुमन्त्राय, भरताय)

**11. श्लोकानाम् अन्वयं पूरयत।** **5**

क. "पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते" ॥

अन्वयः

पृथिव्यां i) --------- रत्नानि जलम् ii) -------- सुभाषितम्, iii) ----------
पाषाण iv) ----------- v) ----------- विधीयत्।

ख. "स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते" ॥

अन्वयः

यः i) -------- उद्दिष्टं ii) --------- सम्यक् अनुतिष्ठति सः iii) ---------
समाः अव्याधिः iv) ----------- न v) --------------।

**12. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 5**

i) <u>सर्वप्राणिषु</u> बन्धुभूतः स्यात्।

ii) <u>तृणं</u> न छिन्द्यात्।

iii) ब्राह्मणः <u>नकुलं</u> मारयति।

iv) <u>आत्मनः</u> ज्ञानेन सर्वं ज्ञातं भवति।

v) आरुणिः <u>श्वेतकेतोः</u> पिता आसीत्।

**13. रेखाङ्कितपदानां अर्थान् चिनुत। 5**

i) एवम् <u>अणिम्नः</u> स्थूलं जगत् उद्भवति।
(स्थूलात्, अटव्याः, सूक्ष्मात्, आकाशात्)

ii) नकुलेन बालसमीपम् <u>उपसर्पन्</u> कृष्णसर्पः दृष्टः।
(समीपं गच्छन्, दूरं गच्छन्, पुरतः गच्छन्, गच्छन्)

iii) <u>एहि</u> वत्स! भ्रातृमनोरथं पूरय।
(गच्छ, आगच्छ, आनय, अपनय)

iv) श्वेतकेतुः आचार्यम् <u>उपेत्य</u> वेदान् अपठत्।
(आगत्य, समीपं गत्वा, अपगत्य, पृष्ट्वा)

v) क्षिप्रमाक्रियमाणस्य कालः पिबति <u>तद्रसम्</u>।
(विपदं, विषमम्, कालम्, आनन्दम्)